# Surya Ashtakam

# सूर्याष्टकम्

## Document Information

Text title : sUryAShTakam 3

File name : sUryAShTakam3.itx

Category : navagraha, aShTaka

Location : doc_z_misc_navagraha

Author : Anantanandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# सूर्याष्टकम्

यस्योदयेनाब्जवनं प्रसन्नं प्रीतो भवत्याशु रथाङ्गवर्गः ।
गावो मृगास्सम्मुदिताश्चरन्ति मार्तण्डमाकाशमणिं तमीडे ॥ १॥

आशाः समस्ता मुदिता भवन्ति गाढं तमो द्यौर्विजहाति विष्वक् ।
ग्राम्या जनाः कर्मणि संप्रवृत्ताः मार्त्तण्डमाकाशमणिं तमीडे ॥ २॥

स्वाहा-स्वधाकाररवं द्विजेन्द्राः कुर्वन्ति कुत्रापि च वेदपाठम् ।
पान्था मुदा सर्वदिशो व्रजन्ति मार्त्तण्डमाकाशमणिं तमीडे ॥ ३॥

देवालये क्वापि नराश्च नार्यः पुष्पादिभिर्देववरं यजन्ति ।
गायन्ति नृत्यन्ति नमन्ति भक्त्या मार्त्तण्डमाकाशमणिं तमीडे ॥ ४॥

छात्राः सतीर्थ्यैरथवा वयस्यैः सार्धं हसन्तो निकटं गुरूणाम् ।
गच्छन्ति विद्याध्ययनाय शीघ्रं मार्त्तण्डमाकाशमणिं तमीडे ॥ ५॥

शीतार्तदेहा मनुजाः प्रसन्नाः कुर्वन्ति कार्याणि समीहितानि ।
विद्यां यथा प्राप्य विदः प्रभग्ना मार्त्ताण्डमाकाशमणिं तमीडे ॥ ६॥

येनैहिकामुष्मिक -कार्यजातं देवादिसन्तोषकरं विभाति ।
योऽसौ विवस्वान् सकलार्थदाता मार्त्ताण्डमाकाशमणिं तमीडे ॥ ७॥

ब्रह्मेश-हर्यादि-समस्तदवाः श्रुता हि नो चाक्षुषगोचरास्ते ।
साक्षादसौ दृष्टिपुरागतो यो मार्त्ताण्डमाकाशमणिं तमीडे ॥ ८॥

सूर्याष्टकमिदं पुण्यं ध्यात्वा सूर्यं पठेद्यदि ।
रोगाः सर्वे विनश्यन्ति नूनं सूर्यप्रसादतः ॥ ९॥

इति श्रीमदनन्तानन्दसरस्वतीविरचितं श्रीसूर्याष्टकं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Surya Ashtakam*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*